## इदन्तो मसि । (४६/३८६८)

छन्दसि विषये मस् इत्ययं शब्दः इकारान्तो भवति । मसः सकारान्तस्य इकारागमो भवति, स च तस्यान्तो भवति । तद्ग्रहणेन गृह्यते इत्यर्थः । 'पुनस्त्वोद्दीपयामसि' (अ.वे. १२.२.५) । [1]उद्दीपयामः इति प्राप्ते । 'शलभं भञ्जयामसि' (पै. ५.२०.४) । भञ्जयामः इति प्राप्ते । 'त्वयि रात्रिं[2] वसामसि' (शौ. १९.४७.९)[3] । वसामः इति प्राप्ते ॥

## क्त्वो यक् । (४७/३८६९)

क्त्वा इत्येतस्य यगागमो भवति छन्दसि विषये । दत्त्वाय (ऋ. १०.८५.३३) [4]सविता धियः । दत्त्वा इति प्राप्ते । 'क्त्वापि छन्दसि' (७.१.३८/३६६०) इत्यस्यानन्तरमिदं [5]कस्मान्नोच्यते ? समासे इति तत्रानुवर्तते ॥

## इष्ट्वीनमिति च । (४८/३८७०)

इष्ट्वीनम् इत्ययं शब्दो निपात्यते छन्दसि विषये । यजेः क्त्वाप्रत्ययान्तस्य ईनम् आदेशोऽन्त्यस्य निपात्यते । 'इष्ट्वीनं देवान्' (आश्व.श्रौ.पृ. २०४) । इष्ट्वा देवान् इति प्राप्ते । [6]पीत्वीनम् इत्यपि इष्यते । चकारस्यानुक्तसमुच्चयार्थत्वात् सिद्धम् ॥

## स्नात्व्यादयश्च । (४९/३८७१)

स्नात्वी इत्येवमादयः शब्दा निपात्यन्ते छन्दसि विषये । 'स्नात्वी मलादिव' (मै.सं. ३.११.१०) । स्नात्वा इति प्राप्ते । 'पीत्वी सोमस्य वावृधे' (ऋ. ३.४०.७) । पीत्वा इति प्राप्ते । प्रकारार्थोऽयमादिशब्दः ॥

## आज्जसेरसुक् । (५०/३८७२)

अवर्णान्तात् अङ्गादुत्तरस्य जसेः असुक् आगमो भवति छन्दसि विषये । 'ब्राह्मणासः पितरः सोम्यासः' (ऋ. ६.७५.१०) । ब्राह्मणाः सोम्याः इति प्राप्ते । 'ये पूर्वासो य उपरासः' (ऋ. १०.१५.२) इत्यत्र परत्वादसुकि [7]पुनः प्रसङ्गविज्ञानात् शीभावः [8]प्राप्तः, 'सकृद्गतौ विप्रतिषेधे यद् बाधितं तद् बाधितमेव' (व्या. प. ४०) इति न भवति ॥

## अश्वक्षीरवृषलवणानामात्मप्रीतौ क्यचि । (५१/२६६२)

छन्दसि [9]इत्यतःप्रभृति निवृत्तम् । अश्व क्षीर वृष लवण [10]इत्येतेषामङ्गानाम् आत्मप्रीतिविषये क्यचि परतोऽसुगागमो भवति । अश्वस्यति वडवा (म.भा. ३.२५८) । क्षीरस्यति माणवकः । वृषस्यति गौः (म.भा. ३.२५८) लवणस्यत्युष्ट्रः । आत्मप्रीतौ इति किम् ? अश्वीयति । क्षीरीयति । वृषीयति । लवणीयति ।

---

1. दीपयामः ब. ड. फ. ह. 2. वासयामसि इति मुद्रितः पाठः 3. वासयामः इति मुद्रितः पाठः 4. सविता नास्ति ई, दत्त्वाय केशान् इच्छन्ति । स्थित्वाय । दत्त्वा स्थित्वा इति प्राप्ते इत्यधिकम् ह. 5. नानुबध्यते ह. 6. पीत्वीनं सोमम् । पीत्वा इति स्थिते क. 7. कृते इत्यधिकम् ब. क. इ. ई. 8. प्राप्तोऽसौ क. इ. 9. इत्यतःप्रभृति नास्ति इ. ह. 10. एतेषाम् नास्ति क.